संस्कृत  संन्यास  प्रयोग-

अ.नं. १०  पंचमाश्रम निरूपणम्

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1) ॥श्रीगणपतयेनमः॥प्रसक्तानुप्रसक्त्या पंचमाश्रमस्वीकारप्रकारो
यथा॥उदगयन आपूर्यमाणपक्षे पुण्याहे शुभनक्षत्रयोगराशि
विशिष्टे प्रभाते नित्यं सामाप्य परमहंस गुरूपसदनं कुर्यात्॥
चतुर्थाश्रम वेलायां यथा गुरुरपेक्षितः॥पंचमाश्रमकालेपि
तथा गुरुरपेक्षितः॥इदं दिनं [illegible] ज्येत परहंसगुरुं विना॥
तिथ्याद्युक्त्वा चतुर्थाश्रमात्पंचमाश्रमम हं गच्छामि॥अनु
ग्रहाणेति गुरूपपत्तिः तथेति गुरुः॥ब्राह्मणद्वारा पंचभूतसं

(२)

स्कारपूर्वकं प्रतिष्ठापितेऽग्नौ ब्रह्ममुद्रां शिथिलीकृत्य जुहुयात्॥
ब्रह्ममुद्रे नमस्तुभ्यं गच्छ त्वं पावकेधुना॥ एतावत्कालपर्यंतं मम
दंडे व्यवस्थिता॥ पावकः सर्वदेवानां निवासस्थानमुच्यते॥ ततः प
रशुमुद्रां सदोरकां जुहोति॥ विष्णुमुद्रे नमस्तुभ्यं भगुरामकरे
स्थिता॥ सदा मे पालनाथाय गच्छ त्वं पावकेधुनेति॥ ततो दं १
डं प्रतिपर्वणि छित्वा जुहोति॥ यथा विष्णुकरे चक्रं यथा शू
लं कपर्दिनः॥ यथा दंडो ब्रह्महस्ते वज्रमिंद्रकरे यथा॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

एतावत्कालपर्यंतममहस्तेव्यवस्थितः॥पावकंप्रतिगछाद्य
काष्ठदंडनमोस्तुते॥ज्ञानदंडोधृतोमेयद्दंडोवाक्काययोरपि॥म
मनास्तित्वयाकार्यंनास्तिनास्तिध्रुवंब्रुवेति॥प्रतिपर्वाणिमं
त्रावृत्तिः॥ततःकमंडलुंमहाह्रदेआपूर्यविनिक्षिपेत्॥कमं
डलोमहातीर्थपवित्रोसित्वयापुरा॥इतःपरंस्नानतीर्थेनि
मग्नोहमलेत्वया॥अंतःशौचंमनोत्पन्नंबहिःशौचेनकिं
भवेत्॥अंतःशौचविहीनस्यबहिःशौचंवृथाकथा॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

ततः कौपीनकटिसूत्रशाटीकंबलपादुकादिकं सीमांते विसृजे
त्॥ दिगंबरोस्मि नग्नोस्मि निर्लज्जोहमहर्निशं॥ जन्मकाले यथा
२ नग्नवस्त्रं नास्ति तथा मम॥ यथा दिगंबरः शंभुः श्रीशुको वामदेववं
त्॥ इति॥ एवं सर्वं परित्यज्य निःसंगो निर्ममत्वो यतिः॥ कामक्रो
तो. धादिरहितं विषयेषु पराङ्मुखः॥ सर्वदा ध्यानशीलोयं निदिध्या २
सनतत्परः॥ अध्यात्मनित्य वेदांती साक्षात्कारानुभाविता॥ अमा
नित्वादिगुणकः सर्वभूतदयापरः॥ यत्किंचित्स्नानसंध्यादि

(२५) अपध्यानादितत्सरः ॥ क्षुत्पिपासानिरासार्थं मन्नोदकपरायणः ॥
परदारपरद्रव्यघातुस्पर्शविवर्जितः ॥ एकाकी संचरेद्भूमिं बालो
न्मत्तपिशाचवत् ॥ इति भिक्षेश्वरस्मृतौ समस्तसंन्यासभेदनिरू
पणं पंच माश्रमनिरूपणं च संपूर्णमस्तु ॥ इति दंडकमंडलुवि
सर्जनविधिः ॥ श्री रामेगत् ॥ ७ ॥ श्री ॥ ॥ श्री ॥ श्री ॥

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com